# Nrisinhatapini Upanishad

# નૃસિંહતાપિન્યુપનિષત્

## Document Information

Text title : nRisi.nhataapinyupanishhat

File name : nrisinha.itx

Category : upanishhat, dashAvatAra, svara

Location : doc_upanishhat

Author : Vedic tradition

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi, Vipin Kumar vedastudy at yahoo.com

Latest update : May 2, 2007, February 2, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# નૃસિંહતાપિન્યુપનિષત્

યત્તુર્યોઙ્કારાગ્રપરાભૂમિસ્થિરવરાસનમ્ ।
પ્રતિયોગિવિનિર્મુક્તતુર્યતુર્યમહં મહઃ ॥

ૐ ભદ્રં કર્ણેભિઃ શ‍ૃણુયામ દેવાઃ ।
ભદ્રં પશ્યેમાક્ષભિર્યજત્રાઃ ।
સ્થિરૈરઙ્ગૈસ્તુષ્ટુવાँ સસ્તનૂભિઃ ।
વ્યશેમ દેવહિતં યદાયુઃ ।
સ્વસ્તિ ન ઇન્દ્રો વૃદ્ધશ્રવાઃ ।
સ્વસ્તિ નઃ પૂષા વિશ્વવેદાઃ ।
સ્વસ્તિ નસ્તાર્ક્ષ્યો અરિષ્ટનેમિઃ ।
સ્વસ્તિ નો બૃહસ્પતિર્દધાતુ ।
ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

ૐ આપો વા ઇદમાસંસ્તત્સલિલમેવ ।
સ પ્રજાપતિરેકઃ પુષ્કરપર્ણે સમભવત્ ।
તસ્યાન્તર્મનસિ કામઃ સમવર્તત ઇદં સૃજેયમિતિ ।
તસ્માદ્યત્પુરુષો મનસાભિગચ્છતિ તદ્વાચા વદતિ
તત્કર્મણા કરોતિ તદેષભ્યનૂક્તા ।
કામસ્તદગ્રે સમવર્તતાધિ મનસો રેતઃ પ્રથમં યદાસીત્ ।
સતો બન્ધુમસતિ નિરવિન્દન્હૃદિ પ્રતીષ્યા કવયો મનીષેતિ
ઉપૈનં તદુપનમતિ યત્કામો ભવતિ ય એવં વેદ
સ તપોઽતપ્યત સ તપસ્તપ્ત્વા સ એતં મન્ત્રરાજં
નારસિંહમાનુષ્ટભમપશ્યત્તેન વૈ સર્વમિદમસૃજત
યદિદં કિઞ્ચ । તસ્માત્સર્વમાનુષ્ટુભમિત્યાચક્ષતે
યદિદં કિઞ્ચ । અનુષ્ટુભો વા ઇમાનિ ભૂતાનિ જાયન્તે
અનુષ્ટુભા જાતાનિ જીવન્તિ અનુષ્ટુભં પ્રયન્ત્યભિસંવિશન્તિ
તસ્યૈષા ભવતિ અનુષ્ટુપ્પ્રથમા ભવતિ

અનુષ્ટુબુત્તમા ભવતિ વાગ્વા અનુષ્ટુપ્ વાચૈવ પ્રયન્તિ
વાચોદ્યન્તિ પરમા વા એષા છન્દસાં યદનુષ્ટુબિતિ ॥ ૧॥

સસાગરાં સપર્વતાં સપ્તદ્વીપાં વસુન્ધરાં તત્સામ્નઃ
પ્રથમં પાદં જાનીયાત્
યક્ષગન્ધર્વાપ્સરોગણસેવિતમન્તરિક્ષં
તત્સામ્નો દ્વિતીયં પાદં જાનીયાદ્વસુરુદ્રાદિત્યૈઃ
સર્વૈર્દેવૈઃ સેવિતં દિવં તત્સામ્નસ્તૃતીયં પાદં જાનીયાત્
બ્રહ્મસ્વરૂપં નિરઞ્જનં પરમવ્યોમ્નિકં તત્સામ્નશ્ચતુર્થં
પાદં જાનીયાદ્યો જાનીતે સોઽમૃતત્વં ચ ગચ્છતિ
ઋગ્યજુઃસામાથર્વાણશ્ચત્વારો વેદાઃ સાઙ્ગાઃ
સશાખાશ્ચત્વારઃ પાદા ભવન્તિ કિં ધ્યાનં કિં દૈવતં
કાન્યઙ્ગાનિ કાનિ દૈવતાનિ કિં છન્દઃ ક ઋષિરિતિ ॥ ૨॥

સ હોવાચ પ્રજાપતિઃ સ યો હ વૈ સાવિત્ર્યસ્યાષ્ટાક્ષરં
પદં શ્રિયાભિષિક્તં તત્સામ્નોઽઙ્ગં વેદ શ્રિયા
હૈવાભિષિચ્યતે સર્વે વેદાઃ પ્રણવાદિકાસ્તં પ્રણવં
તત્સામ્નોઽઙ્ગં વેદ સ ત્રીંલ્લોકાઞ્જયતિ ચતુર્વિંશત્યક્ષરા
મહાલક્ષ્મીર્યજુસ્તત્સામ્નોઽઙ્ગં વેદ સ આયુર્યશઃકીર્તિ-
જ્ઞાનૈશ્વર્યવાન્ભવતિ તસ્માદિદં સાઙ્ગં સામ
જાનીયાદ્યો જાનીતે સોઽમૃતત્વં ચ ગચ્છતિ સાવિત્રીં
પ્રણવં યજુર્લક્ષ્મીં સ્ત્રીશૂદ્રાય નેચ્છન્તિ
દ્વાત્રિંશદક્ષરં સામ જાનીયાદ્યો જાનીતે
સોઽમૃતત્વં ચ ગચ્છતિ સાવિત્રીં લક્ષ્મીં યજુઃ પ્રણવં
યદિ જાનીયાત્ સ્ત્રી શૂદ્રઃ સ મૃતોઽધો ગચ્છતિ
તસ્માત્સર્વદા નાચષ્ટે યદ્યાચષ્ટે
સ આચાર્યસ્તેનૈવ સ મૃતોઽધો ગચ્છતિ ॥ ૩॥

સ હોવાચ પ્રજાપતિઃ અગ્નિર્વૈ દેવા ઇદં સર્વં વિશ્વા
ભૂતાનિ પ્રાણા વા ઇન્દ્રિયાણિ પશવોઽન્નમમૃતં
સમ્રાટ્ સ્વરાડ્વિરાટ્ તત્સામ્નઃ પ્રથમં પાદં જાનીયાત્
ઋગ્યજુઃસામાથર્વરૂપઃ સૂર્યોઽન્તરાદિત્યે હિરણ્મયઃ
પુરુષસ્તત્સામ્નો દ્વિતીયં પાદં જાનીયાત્ ય ઓષધીનાં
પ્રભુર્ભવતિ તારાધિપતિઃ સોમસ્તત્સામ્નસ્તૃતીયં પાદં

જાનીયાત્ સ બ્રહ્મા સ શિવઃ સ હરિઃ સેન્દ્રઃ સોઽક્ષરઃ
પરમઃ સ્વરાટ્ તત્સામ્નશ્ચતુર્થં પાદં જાનીયાદ્યો જાનીતે
સોઽમૃતત્વં ચ ગચ્છતિ ઉગ્રં પ્રથમસ્યાદ્યં જ્વલં
દ્વિતીયસ્યાદ્યં નૃસિંહં તૃતીયસ્યાદ્યં મૃત્યું
ચતુર્થસ્યાદ્યં સામ જાનીયાદ્યો જાનીતે સોઽમૃતત્વં ચ
ગચ્છતિ તસ્માદિદં સામ યત્ર કુત્રચિન્નાચષ્ટે યદિ
દાતુમપેક્ષતે પુત્રાય શુશ્રૂષવે દાસ્યત્યન્યસ્મૈ
શિષ્યાય વા ચેતિ ॥ ૪॥

સ હોવાચ પ્રજાપતિઃ ક્ષીરોદાર્ણવશાયિનં નૃકેસરિવિગ્રહં
યોગિધ્યેયં પરં પદં સામ જાનીયાદ્યો જાનીતે સોઽમૃતત્વં
ચ ગચ્છતિ વીરં પ્રથમસ્યાદ્યાર્ધાન્ત્યં તં સ
દ્વિતીયસ્યાદ્યાર્ધાન્ત્યં હં ભી તૃતીયસ્યાદ્યાર્ધાન્ત્યં
મૃત્યું ચતુર્થસ્યાદ્યાર્ધાન્ત્યં સામ તુ જાનીયાદ્યો જાનીતે
variation found with syAdyArdhAntyam vs syArdhAntyam
સોઽમૃતત્વં ચ ગચ્છતિ તસ્માદિદં સામ યેન
કેનચિદાચાર્યમુખેન યો જાનીતે સ તેનૈવ શરીરેણ
સંસારાન્મુચ્યતે મોચયતિ મુમુક્ષુર્ભવતિ જપાત્તેનૈવ શરીરેણ
દેવતાદર્શનં કરોતિ તસ્માદિદમેવ મુખ્યદ્વારં કલૌ
નાન્યેષાં ભવતિ તસ્માદિદં સાઙ્ગં સામ જાનીયાદ્યો જાનીતે
સોઽમૃતત્વં ચ ગચ્છતિ ॥ ૫॥

ઋતં સત્યં પરં બ્રહ્મ પુરુષં કૃષ્ણપિઙ્ગલમ્ ।
ઊર્ધ્વરેતં વિરૂપાક્ષં શઙ્કરં નીલલોહિતમ્ ॥

ઉમાપતિઃ પશુપતિઃ પિનાકી હ્યમિતદ્યુતિઃ ।
ઈશાનઃ સર્વવિદ્યાનામીશ્વરઃ સર્વભૂતાનાં
બ્રહ્માધિપતિર્બ્રહ્મણોઽધિપતિર્યો વૈ યજુર્વેદવાચ્યસ્તં
સામ જાનીયાદ્યો જાનીતે સોઽમૃતત્વં ચ ગચ્છતિ
મહાપ્રથમાન્તાર્ધસ્યાદ્યન્તવતો દ્વિતીયાન્તાર્ધસ્યાદ્યં
ષણં તૃતીયાન્તાર્ધસ્યાદ્યં નામા ચતુર્થાન્તાર્ધસ્યાદ્યં
સામ જાનીતે સોઽમૃતત્વં ચ ગચ્છતિ તસ્માદિદં સામ
સચ્ચિદાનન્દમયં પરં બ્રહ્મ તમેવવંવિદ્વાનમૃત
ઇહ ભવતિ તસ્માદિદં સાઙ્ગં સામ જાનીયાદ્યો જાનીતે

સોઽમૃતત્વં ચ ગચ્છતિ ॥ ૬॥

વિશ્વસૃજ એતેન વૈ વિશ્વમિદમસૃજન્ત યદ્વિશ્વમસૃજન્ત
તસ્માદ્વિશ્વસૃજો વિશ્વમેનાનનુ પ્રજાયતે બ્રહ્મણઃ
સલોકતાં સાર્ષ્ટિતાં સાયુજ્યં યાન્તિ તસ્માદિદં
સાઙ્ગં સામ જાનીયાદ્યો જાનીતે સોઽમૃતત્વં ચ ગચ્છતિ
વિષ્ણું પ્રથમાન્ત્યં મુખં દ્વિતીયાન્ત્યં ભદ્રં
તૃતીયાન્ત્યં મ્યહં ચતુર્થ્યાન્તં સામ જાનીયાદ્યો
var chaturthasyAntaM
જાનીતે સોઽમૃતત્વં ચ ગચ્છતિ સ્ત્રીપુંસયોર્વા ઇહૈવ
સ્થાતુમપેક્ષતે તસ્મૈ સર્વૈશ્વર્યં દદાતિ યત્ર કુત્રાપિ
મ્રિયતે દેહાન્તે દેવઃ પરમં બ્રહ્મ તારકં વ્યાચષ્ટે
યેનાસાવમૃતીભૂત્વા સોઽમૃતત્વં ચ ગચ્છતિ
તસ્માદિદં સામ મધ્યગં જપતિ તસ્માદિદં સામાઙ્ગં
પ્રજાપતિસ્તસ્માદિદં સામાઙ્ગં પ્રજાપતિર્ય એવં વેદેતિ
મહોપનિષત્ । ય એતાં મહોપનિષદં વેદ સ
કૃતપુરશ્ચરણો મહાવિષ્ણુર્ભવતિ મહાવિષ્ણુર્ભવતિ ॥ ૭॥

ઇતિ પ્રથમોપનિષત્ ॥ ૧॥

દેવા હ વૈ મૃત્યોઃ પાપ્મભ્યઃ સંસારાચ્ચ બિભીયુસ્તે
પ્રજાપતિમુપાધાવંસ્તેભ્ય એતં મન્ત્રરાજં
નારસિંહમાનુષ્ટુભં પ્રાયચ્છત્તેન વૈ તે મૃત્યુમજયન્
પાપ્માનં ચાતરન્સંસારં ચાતરંસ્તસ્માદ્યો મૃત્યોઃ
પાપ્મભ્યઃ સંસારાચ્ચ બિભીયાત્સ એતં મન્ત્રરાજં
નારસિંહમાનુષ્ટુભં પ્રતિગૃહ્ણીયાત્સ મૃત્યું તરતિ
સ પાપ્માનં તરતિ સ સંસારં તરતિ તસ્ય હ વૈ પ્રણવસ્ય
યા પૂર્વા માત્રા પૃથિવ્યકારઃ સ ઋગ્ભિરૃગ્વેદો બ્રહ્મા
વસવો ગાયત્રી ગાર્હપત્યઃ સા સામ્નઃ પ્રથમઃ પાદો ભવતિ
દ્વિતીયાન્તરિક્ષં સ ઉકારઃ સ યજુર્ભિર્યજુર્વેદો વિષ્ણુરુદ્રા-
સ્ત્રિષ્ટુબ્દક્ષિણાગ્નિઃ સા સામ્નો દ્વિતીયઃ પાદો ભવતિ
તૃતીયા દ્યૌઃ સ મકારઃ સ સામભિઃ સામવેદો રુદ્રા
આદિત્યા જગત્યાહવનીયઃ સા સામ્નસ્તૃતીયઃ પાદો ભવતિ
યાવસાનેઽસ્ય ચતુર્થ્યર્ધમાત્રા સ સોમલોક ઓઙ્કારઃ

સોઽથર્વણૈર્મન્ત્રૈરથર્વવેદઃ સંવર્તકોઽગ્નિર્મરુતો
વિરાડેકર્ષિર્ભાસ્વતી સ્મૃતા સા સામ્નશ્ચતુર્થઃ
પાદો ભવતિ ॥ ૧॥

અષ્ટાક્ષરઃ પ્રથમઃ પાદો ભવત્યષ્ટાક્ષરાસ્ત્રયઃ
પાદા ભવન્ત્યેવં દ્વાત્રિંશદક્ષરાણિ સમ્પદ્યન્તે
દ્વાત્રિંશદક્ષરા વા અનુષ્ટુબ્ભવત્યનુષ્ટુભા
સર્વમિદં સૃષ્ટમનુષ્ટુભા સર્વમુપસંહૃતં
તસ્ય હૈતસ્ય પઞ્ચાઙ્ગાનિ ભવન્તિ ચત્વારઃ
પાદાશ્ચત્વાર્યઙ્ગાનિ ભવન્તિ સપ્રણવં સર્વં
પઞ્ચમં ભવતિ હૃદયાય નમઃ શિરસે સ્વાહા
શિખાયૈ વષટ્ કવચાય હું અસ્ત્રાય ફડિતિ
પ્રથમં પ્રથમેન સંયુજ્યતે દ્વિતીયં દ્વિતીયેન
તૃતીયં તૃતીયેન ચતુર્થં ચતુર્થેન પઞ્ચમં
પઞ્ચમેન વ્યતિષજતિ વ્યતિષિક્તા વા ઇમે
લોકાસ્તસ્માદ્વ્યતિષિક્તાન્યઙ્ગાનિ ભવન્તિ
ઓમિત્યેતદક્ષરમિદં સર્વં તસ્માત્પ્રત્યક્ષરમુભયત
ઓઙ્કારો ભવતિ અક્ષરાણાં ન્યાસમુપદિશન્તિ
બ્રહ્મવાદિનઃ ॥ ૨॥

તસ્ય હ વા ઉગ્રં પ્રથમં સ્થાનં જાનીયાદ્યો
જાનીતે સોઽમૃતત્વં ચ ગચ્છતિ વીરં દ્વિતીયં સ્થાનં
મહાવિષ્ણું તૃતીયં સ્થાનં જ્વલન્તં ચતુર્થં
સ્થાનં સર્વતોમુખં પઞ્ચમં સ્થાનં નૃસિંહં
ષષ્ઠં સ્થાનં ભીષણં સપ્તમં સ્થાનં
ભદ્રમષ્ટમં સ્થાનં મૃત્યુમૃત્યું નવમં સ્થાનં
નમામિ દશમં સ્થાનમહમેકાદશં સ્થાનં
જાનીયાદ્યો જાનીતે સોઽમૃતત્વં ચ ગચ્છતિ એકાદશપદા
વા અનુષ્ટુબ્ભવત્યનુષ્ટુભા સર્વમિદં સૃષ્ટમનુષ્ટુભા
સર્વમિદમુપસંહૃતં તસ્માત્સર્વાનુષ્ટુભં જાનીયાદ્યો
જાનીતે સોઽમૃતત્વં ચ ગચ્છતિ ॥ ૩॥

દેવા હ વૈ પ્રજાપતિમબ્રુવન્નથ કસ્માદુચ્યત
ઉગ્રમિતિ સ હોવાચ પ્રજાપતિર્યસ્માત્સ્વમહિમ્ના

સર્વાꣳ લ્લોકાન્સર્વાન્દેવાન્સર્વાનાત્મનઃ સર્વાણિ
ભૂતાન્યુદ્ગૃહ્ણાત્યજસ્રં સૃજતિ વિસૃજતિ
વિવાસયત્યુદ્ગ્રાહ્યત ઉદ્ગૃહ્યતે સ્તુહિ શ્રુતં ગર્તસદં
યુવાનં મૃગં ન ભીમમુપહન્તુમુગ્રં
મૃડાજરિત્રે રુદ્રસ્તવાનો અન્યન્તે અસ્મન્નિવપન્તુ સેનાઃ
var સિંહસ્તવાનો
તસ્માદુચ્યત ઉગ્રમિતિ ॥

અથ કસ્માદુચ્યતે વીરમિતિ યસ્માત્સ્વમહિમ્ના
સર્વાꣳ લ્લોકાન્સર્વાન્દેવાન્સર્વાનાત્મનઃ સર્વાણિ
ભૂતાનિ વિરમતિ વિરામયત્યજસ્રં સૃજતિ વિસૃજતિ વાસયતિ
યતો વીરઃ કર્મણ્યઃ સુદક્ષો યુક્તગ્રાવા જાયતે
દેવકામસ્તસ્માદુચ્યતે વીરમિતિ ॥

અથ કસ્માદુચ્યતે મહાવિષ્ણુમિતિ યસ્માત્સ્વમહિમ્ના
સર્વાꣳ લ્લોકાન્સર્વાન્દેવાન્સર્વાનાત્મનઃ સર્વાણિ
ભૂતાનિ વ્યાપ્નોતિ વ્યાપયતિ સ્નેહો યથા
પલલપિણ્ડં શાન્તમૂલમોતં પ્રોતમનુવ્યાસં
variation પલલપિણ્ડમોતપ્રોતમનુપ્રાપ્તં
વ્યતિષિક્તો વ્યાપયતે
યસ્માન્ન જાતઃ પરો અન્યો અસ્તિ ય આવિવેશ ભુવનાનિ વિશ્વા
પ્રજાપતિઃ પ્રજયા સંવિદાનઃ ત્રીણિ જ્યોતીંષિ સચતે
સષોડશીં તસ્માદુચ્યતે મહાવિષ્ણુમિતિ ॥

var ષોડશીતિ ।
અથ કસ્માદુચ્યતે જ્વલન્તમિતિ યસ્માત્સ્વમહિમ્ના
સર્વાંલ્લોકાન્સર્વાન્દેવાન્સર્વાનાત્મનઃ સર્વાણિ
સ્વતેજસા જ્વલતિ જ્વાલયતિ જ્વાલ્યતે જ્વાલયતે સવિતા પ્રસવિતા
દીપ્તો દીપયન્દીપ્યમાનઃ જ્વલં જ્વલિતા
તપન્વિતપન્ત્સંતપન્નોચનો
રોચમાનઃ શોભનઃ શોભમાનઃ કલ્યાણસ્તસ્માદુચ્યતે
જ્વલન્તમિતિ ॥

અથ કસ્માદુચ્યતે સર્વતોમુખમિતિ યસ્માત્સ્વમહિમ્ના

સર્વાꣳ લ્લોકાન્સર્વાન્દેવાન્સર્વાનાત્મનઃ સર્વાણિ ભૂતાનિ
સ્વયમનિન્દ્રિયોऽપિ સર્વતઃ પશ્યતિ સર્વતઃ શ‍ૃણોતિ
સર્વતો ગચ્છતિ સર્વત આદત્તે સર્વગઃ સર્વગતસ્તિષ્ઠતિ ।
એકઃ પુરસ્તાદ્ય ઇદં બભૂવ યતો બભૂવ ભુવનસ્ય ગોપાઃ ।
યમપ્યેતિ ભુવનં સામ્પરાયે નમામિ તમહં
સર્વતોમુખમિતિ તસ્માદુચ્યતે સર્વતોમુખમિતિ ॥

અથ કસ્માદુચ્યતે નૃસિંહમિતિ યસ્માત્સર્વેષાં ભૂતાનાં
ના વીર્યતમઃ શ્રેષ્ઠતમશ્ચ સિંહો વીર્યતમઃ
શ્રેષ્ઠતમશ્ચ । તસ્માન્નૃસિંહ આસીત્પરમેશ્વરો
જગદ્ધિતં વા એતદ્રૂપં યદક્ષરં ભવતિ પ્રતદ્વિષ્ણુસ્તવતે
variation પ્રતદ્વિષ્ણુઃ સ્તવતે
વીર્યાય મૃગો ન ભીમઃ કુચરો ગિરિષ્ઠાઃ । યસ્યોરુષુ
ત્રિષુ વિક્રમણેષ્વધિક્ષિયન્તિ ભુવનાનિ વિશ્વા તસ્માદુચ્યતે
નૃસિંહમિતિ ॥

અથ કસ્માદુચ્યતે ભીષણમિતિ યસ્માદ્ભીષણં
યસ્ય રૂપં દૃષ્ટ્વા સર્વે લોકાઃ સર્વે દેવાઃ
સર્વાણિ ભૂતાનિ ભીત્યા પલાયન્તે સ્વયં યતઃ કુતશ્ચ
ન બિભેતિ ભીષાસ્માદ્વાતઃ પવતે ભીષોદેતિ સૂર્યઃ
ભીષાસ્માદગ્નિશ્ચેન્દ્રશ્ચ મૃત્યુર્ધાવતિ પઞ્ચમ
ઇતિ તસ્માદુચ્યતે ભીષણમિતિ ॥

અથ કસ્માદુચ્યતે ભદ્રમિતિ યસ્માત્સ્વયં ભદ્રો ભૂત્વા
સર્વદા ભદ્રં દદાતિ રોચનો રોચમાનઃ શોભનઃ
શોભમાનઃ કલ્યાણઃ । ભદ્રં કર્ણેભિઃ શ‍ૃણુયામ
દેવાઃ ભદ્રં પશ્યેમાક્ષભિર્યજત્રાઃ
સ્થિરૈરઙ્ગૈસ્તુષ્ટુવાꣳ સસ્તનૂભિર્વ્યશેમ દેવહિતં
યદાયુઃ તસ્માદુચ્યતે ભદ્રમિતિ ॥

અથ કસ્માદુચ્યતે મૃત્યુમૃત્યુમિતિ યસ્માત્સ્વમહિમ્ના
સ્વભક્તાનાં સ્મૃત એવ મૃત્યુમપમૃત્યું ચ મારયતિ ।
ય આત્મદા બલદા યસ્ય વિશ્વ ઉપાસતે પ્રશિષં યસ્ય
દેવાઃ યસ્ય છાયામૃતં યો મૃત્યુમૃત્યુઃ કસ્મૈ

દેવાય હવિષા વિધેમ તસ્માદુચ્યતે મૃત્યુમૃત્યુમિતિ ॥

અથ કસ્માદુચ્યતે નમામીતિ યસ્માદ્યં સર્વે દેવા નમન્તિ
મુમુક્ષવો બ્રહ્મવાદિનશ્ચ । પ્ર નૂનં બ્રહ્મણસ્પતિર્મન્ત્રં
વદત્યુક્થ્યં
variation વદત્યુક્થં
યસ્મિન્નિન્દ્રો વરુણો મિત્રો અર્યમા દેવા ઓકાંસિ
ચક્રિરે તસ્માદુચ્યતે નમામીતિ ॥

અથ કસ્માદુચ્યતેઽહમિતિ । અહમસ્મિ પ્રથમજા ઋતાસ્ય
પૂર્વં દેવેભ્યો અમૃતસ્ય નાભિઃ । variation નાભાયિ
યો મા દદાતિ સ ઇદેવમાવાઃ અહમન્નમન્નમદન્તમદ્મિ અહં વિશ્વં
variation અહમન્નમન્નમદન્તમાદ્મિ
ભુવનમભ્યભવાં સુવર્ણજ્યોતિર્ય એવં વેદેતિ મહોપનિષત્ ॥ ૪॥

ઇતિ દ્વિતીયોપનિષત્ ॥ ૨॥

દેવા હ વૈ પ્રજાપતિમબ્રુવન્નાનુષ્ટુભસ્ય
મન્ત્રરાજસ્ય નારસિંહસ્ય શક્તિં બીજં નો
બ્રૂહિ ભગવન્નિતિ સ હોવાચ પ્રજાપતિર્માયા વા
એષા નારસિંહી સર્વમિદં સૃજતિ સર્વમિદં રક્ષતિ
સર્વમિદં સંહરતિ તસ્માન્માયામેતાં શક્તિં
વિદ્યાદ્ય એતાં માયાં શક્તિં વેદ સ પાપ્માનં
તરતિ સ મૃત્યું તરતિ સ સંસારં તરતિ સોઽમૃતત્વં
ચ ગચ્છતિ મહતીં શ્રિયમશ્નુતે મીમાંસન્તે
બ્રહ્મવાદિનો હ્રસ્વા દીર્ઘા પ્લુતા ચેતિ ॥

યદિ હ્રસ્વા ભવતિ સર્વં પાપ્માનં દહત્યમૃતત્વં
ચ ગચ્છતિ યદિ દીર્ઘા ભવતિ મહતીં
શ્રિયમાપ્નોત્યમૃતત્વં ચ ગચ્છતિ યદિ પ્લુતા ભવતિ
જ્ઞાનવાન્ભવત્યમૃતત્વં ચ ગચ્છતિ તદેતદૃષિણોક્તં
નિદર્શનં સ ઈં પાહિ ય ઋજીષી તરુત્રઃ શ્રિયં
લક્ષ્મીમૌપલામમ્બિકાં ગાં ષષ્ઠીં ચ
યામિન્દ્રસેનેત્યુદાહુઃ તાં વિદ્યાં બ્રહ્મયોનિં
સરૂપામિહાયુષે શરણમહં પ્રપદ્યે સર્વેષાં વા

 variation  સરૂપાં તામિહાયુષે
એતદ્ભૂતાનામાકાશઃ પરાયણં સર્વાણિ હ વા ઇમાનિ
ભૂતાન્યાકાશાદેવ જાયન્ત આકાશાદેવ જાતાનિ
જીવન્ત્યાકાશં પ્રયત્યભિસંવિશન્તિ તસ્માદાકાશં
બીજં વિદ્યાત્તદેવ જ્યાયસ્તદેતદૃષિણોક્તં નિદર્શનં
હંસઃ શુચિષદ્વસુરન્તરિક્ષસદ્ધોતા
વેદિષદતિથિર્દુરોણસત્ ॥

નૃષદ્વરસદૃતસદ્વ્યોમસદબ્જાગોજા ઋતજા અદ્રિજા
ઋતં બૃહત્ ॥

ય એવં વેદેતિ મહોપનિષત્ ॥

ઇતિ તૃતીયોપનિષત્ ॥ ૩॥

દેવા હ વૈ પ્રજાપતિમબ્રુવન્નનુષ્ટુભસ્ય
મન્ત્રરાજસ્ય નારસિંહસ્યાઙ્ગમન્ત્રાન્નો
બ્રૂહિ ભગવ ઇતિ સ હોવાચ પ્રજાપતિઃ પ્રણવં
સાવિત્રીં યજુર્લક્ષ્મીં નૃસિંહગાયત્રીમિત્યઙ્ગાનિ
જાનીયાદ્યો જાનીતે સોઽમૃતત્વં ચ ગચ્છતિ ॥ ૧॥

ઓમિત્યેતદક્ષરમિદં સર્વં તસ્યોપવ્યાખ્યાનં
ભૂતં ભવદ્ભવિષ્યદિતિ સર્વમોઙ્કાર એવ
યચ્ચાન્યત્ત્રિકાલાતીતં તદપ્યોઙ્કાર એવ સર્વં
હ્યેતદ્બ્રહ્માયમાત્મા બ્રહ્મ સોઽયમાત્મા
ચતુષ્પાજ્જાગરિતસ્થાનો બહિઃપ્રજ્ઞઃ સપ્તાઙ્ગ
એકોનવિંશતિમુખઃ સ્થૂલભુગ્વૈશ્વાનરઃ
પ્રથમઃ પાદઃ । સ્વપ્નસ્થાનેઽન્તપ્રજ્ઞઃ
સપ્તાઙ્ગ એકોનવિંશતિમુખઃ પ્રવિવિક્તભુક્તૈજસો
દ્વિતીયઃ પાદઃ । યત્ર સુપ્તો ન કઞ્ચન કામં
કામયતે ન કઞ્ચન સ્વપ્નં પશ્યતિ તત્સુષુપ્તં
સુષુપ્તસ્થાન એકીભૂતઃ પ્રજ્ઞાનઘન એકાનન્દમયો
હ્યાનન્દભુક્ ચેતોમુખઃ પ્રાજ્ઞસ્તૃતીયો પાદઃ ।
એષ સર્વેશ્વર એષ સર્વજ્ઞ એષોઽન્તર્યામ્યેષ
યોનિઃ સર્વસ્ય પ્રભવાપ્યયૌ હિ ભૂતાનાં

નાન્તઃપ્રજ્ઞં ન બહિઃપ્રજ્ઞં નોભયતઃપ્રજ્ઞં
ન પ્રજ્ઞં નાપ્રજ્ઞં ન પ્રજ્ઞાનઘનમદૃષ્ટ-
મવ્યવહાર્યમગ્રાહ્યમલક્ષણમચિન્ત્યમવ્યપદેશ્ય-
મૈકાત્મ્યપ્રત્યયસારં પ્રપઞ્ચોપશમં શાન્તં
શિવમદ્વૈતં ચતુર્થં મન્યન્તે સ આત્મા સ વિજ્ઞેયઃ ॥ ૨॥

અથ સાવિત્રી ગાયત્ર્યા યજુષા પ્રોક્તા તયા
સર્વમિદં વ્યાપ્તં ઘૃણિરિતિ દ્વે અક્ષરે સૂર્ય
ઇતિ ત્રીણિ એતદ્વૈ સાવિત્રસ્યાષ્ટાક્ષરં પદં
શ્રિયાભિષિક્તં ય એવં વેદ શ્રિયા હૈવાભિષિચ્યતે ।
તદેતદૃચાભ્યુક્તં ઋચો અક્ષરે પરમે
વ્યોમન્યસ્મિન્દેવા અધિવિશ્વે નિષેદુઃ । યસ્તન્ન વેદ
કિમૃચા કરિષ્યતિ ય ઇત્તદ્વિદુસ્ત ઇમે સમાસત
ઇતિ ન હ વા એતસ્યર્ચા ન યજુષા ન સામ્નાર્થોઽસ્તિ
યઃ સાવિત્રીં વેદેતિ । ૐ ભૂર્લક્ષ્મીર્ભુવર્લક્ષ્મીઃ
સ્વર્લક્ષ્મીઃ કાલકર્ણી તન્નો મહાલક્ષ્મીઃ
પ્રચોદયાત્ ઇત્યેષા વૈ મહાલક્ષ્મીર્યજુર્ગાયત્રી
ચતુર્વિંશત્યક્ષરા ભવતિ । ગાયત્રી વા ઇદં સર્વં
યદિદં કિઞ્ચ તસ્માદ્ય એતાં મહાલક્ષ્મીં
યાજુષીં વેદ મહતીં શ્રિયમશ્નુતે ।
ૐ નૃસિંહાય વિદ્મહે વજ્રનખાય ધીમહિ ।
તન્નઃ સિંહઃ પ્રચોદયાત્ ઇત્યેષા વૈ નૃસિંહગાયત્રી
દેવાનાં વેદાનાં નિદાનં ભવતિ ય એવં વેદ
નિદાનવાન્ભવતિ ॥ ૩॥

દેવા હ વૈ પ્રજાપતિમબ્રુવન્નથ કૈર્મન્ત્રૈઃ
સ્તુતો દેવઃ પ્રીતો ભવતિ સ્વાત્માનં દર્શયતિ
તન્નો બ્રૂહિ ભગવન્નિતિ સ હોવાચ પ્રજાપતિઃ ।
ૐ યો હ વૈ નૃસિંહો દેવો ભગવાન્યશ્ચ
બ્રહ્મા ભૂર્ભુવઃ સ્વસ્તસ્મૈ વૈ નમો નમઃ ॥ ૧॥

[યથા પ્રથમમન્ત્રોક્તાવાદ્યન્તૌ તથા
સર્વમન્ત્રેષુ દ્રષ્ટવ્યૌ]॥ યશ્ચ વિષ્ણુઃ ॥ ૨॥

યશ્ચ મહેશ્વરઃ ॥ ૩॥ યશ્ચ પુરુષઃ ॥ ૪॥

યશ્ચેશ્વરઃ ॥ ૫॥ યા સરસ્વતી ॥ ૬॥ યા શ્રીઃ ॥ ૭॥

યા ગૌરી ॥ ૮॥ યા પ્રકૃતિઃ ॥ ૯॥ યા વિદ્યા ॥ ૧૦॥

યશ્ચોઙ્કારઃ ॥ ૧૧॥ યાશ્ચતસ્રોઽર્ધમાત્રાઃ ॥ ૧૨॥

યે વેદાઃ સાઙ્ગાઃ સશાખાઃ સેતિહાસાઃ ॥ ૧૩॥

યે ચ પઞ્ચાગ્નયઃ ॥ ૧૪॥ યાઃ સપ્ત મહાવ્યાહૃતયઃ ॥ ૧૫॥

યે ચાષ્ટૌ લોકપાલાઃ ॥ ૧૬॥ યે ચાષ્ટૌ વસવઃ ॥ ૧૭॥

યે ચૈકાદશ રુદ્રાઃ ॥ ૧૮॥ યે ચ દ્વાદશાદિત્યાઃ ॥ ૧૯॥

યે ચાષ્ટૌ ગ્રહાઃ ॥ ૨૦॥ યાનિ ચ પઞ્ચમહાભૂતાનિ ॥ ૨૧॥

યશ્ચ કાલઃ ॥ ૨૨॥ યશ્ચ મનુઃ ॥ ૨૩॥ યશ્ચ મૃત્યુઃ ॥ ૨૪॥

યશ્ચ યમઃ ॥ ૨૫॥ યશ્ચાન્તકઃ ॥ ૨૬॥ યશ્ચ પ્રાણઃ ॥ ૨૭॥

યશ્ચ સૂર્યઃ ॥ ૨૮॥ યશ્ચ સોમઃ ॥ ૨૯॥

યશ્ચ વિરાટ્ પુરુષઃ ॥ ૩૦॥ યશ્ચ જીવઃ ॥ ૩૧॥

યચ્ચ સર્વમ્ ॥ ૩૨॥ ઇતિ દ્વાત્રિંશત્ ઇતિ
તાન્પ્રજાપતિરબ્રવીદેતૈર્મન્ત્રૈર્નિત્યં દેવં સ્તુવધ્વમ્ ।
તતો દેવઃ પ્રીતો ભવતિ સ્વાત્માનં દર્શયતિ તસ્માદ્ય
એતૈર્મન્ત્રૈર્નિત્યં દેવં સ્તૌતિ સ દેવં પશ્યતિ સોઽમૃતત્વં
ચ ગચ્છતિ ય એવં વેદેતિ મહોપનિષત્ ॥

ઇતિ ચતુર્થ્યુપનિષત્ ॥ ૪॥

દેવા હ વૈ પ્રજાપતિમબ્રુવન્નાનુષ્ટુભસ્ય
મન્ત્રરાજસ્ય નારસિંહસ્ય મહાચક્રં નામ
ચક્રં નો બ્રૂહિ ભગવ ઇતિ સાર્વકામિકં મોક્ષદ્વારં
યદ્યોગિન ઉપદિશન્તિ સ હોવાચ પ્રજાપતિઃ ષડક્ષરં
વા એતત્સુદર્શનં મહાચક્રં તસ્માત્ષડરં
ભવતિ ષટ્પત્રં ચક્રં ભવતિ ષડ્વા ઋતવ ઋતુભિઃ
સમ્મિતં ભવતિ મધ્યે નાભિર્ભવતિ નાભ્યાં વા એતે અરાઃ
પ્રતિષ્ઠિતા માયયા એતત્સર્વં વેષ્ટિતં ભવતિ

નાત્માનં માયા સ્પૃશતિ તસ્માન્માયયા બહિર્વેષ્ટિતં
ભવતિ । અથાષ્ટારમષ્ટપત્રં ચક્રં ભવત્યષ્ટાક્ષરા
વૈ ગાયત્રી ગાયત્ર્યા સમ્મિતં ભવતિ બહિર્માયયા
વેષ્ટિતં ભવતિ ક્ષેત્રં ક્ષેત્રં વૈ માયૈષા સમ્પદ્યતે ।
અથ દ્વાદશારં દ્વાદશપત્રં ચક્રં ભવતિ
દ્વાદશાક્ષરા વૈ જગતી જગત્યા સમ્મિતં ભવતિ
બહિર્માયયા વેષ્ટિતં ભવતિ । અથ ષોડશારં
ષોડશપત્રં ચક્રં ભવતિ ષોડશકલો વૈ પુરુષઃ
પુરુષ એવેદં સર્વં પુરુષેણ સમ્મિતં ભવતિ
માયયા બહિર્વેષ્ટિતં
ભવતિ । અથ દ્વાત્રિંશદરં દ્વાત્રિંશત્પત્રં ચક્રં
ભવતિ દ્વાત્રિંશદક્ષરા વા અનુષ્ટુબ્ભવત્યનુષ્ટુભા
સર્વમિદં ભવતિ બહિર્માયયા વેષ્ટિતં ભવત્યરૈર્વા
એતત્સુબદ્ધં ભવતિ વેદા વા એતે અરાઃ પત્રૈર્વા
એતત્સર્વતઃ પરિક્રામતિ છન્દાંસિ વૈ પત્રાણિ ॥ ૧॥

એતત્સુદર્શનં મહાચક્રં તસ્ય મધ્યે નાભ્યાં
તારકં યદક્ષરં નારસિંહમેકાક્ષરં
તદ્ભવતિ ષટ્સુ પત્રેષુ ષડક્ષરં સુદર્શનં
ભવત્યષ્ટસુ પત્રેષ્વષ્ટાક્ષરં નારાયણં
ભવતિ દ્વાદશસુ પત્રેષુ દ્વાદશાક્ષરં વાસુદેવં
ભવતિ ષોડશસુ પત્રેષુ માતૃકાદ્યાઃ સબિન્દુકાઃ
ષોડશ સ્વરા ભવન્તિ દ્વાત્રિંશત્સુ પત્રેષુ
દ્વાત્રિંશદક્ષરં મન્ત્રરાજં નારસિંહમાનુષ્ટુભં
ભવતિ તદ્વા એતત્સુદર્શનં નામ ચક્રં સાર્વકામિકં
મોક્ષદ્વારમૃઙ્મયં યજુર્મયં સામમયં
બ્રહ્મમયમમૃતમયં ભવતિ તસ્ય પુરસ્તાદ્વસવ
આસતે રુદ્રા દક્ષિણત આદિત્યાઃ પશ્ચાદ્વિશ્વેદેવા
ઉત્તરતો બ્રહ્મવિષ્ણુમહેશ્વરા નાભ્યાં સૂર્યાચન્દ્રમસૌ
પાર્શ્વયોસ્તદેતદૃચાભ્યુક્તમ્ । ઋચો અક્ષરે પરમે
વ્યોમન્યસ્મિન્દેવા અધિવિશ્વે નિષેદુઃ । યસ્તન્ન વેદ
કિમૃચા કરિષ્યતિ ય ઇત્તદ્વિદુસ્ત ઇમે સમાસત ઇતિ

તદેતત્સુદર્શનં મહાચક્રં બાલો વા યુવા વા
વેદ સ મહાન્ભવતિ સ ગુરુઃ સર્વેષાં
મન્ત્રાણામુપદેષ્ટા ભવત્યનુષ્ટુભા હોમં
કુર્યાદનુષ્ટુભાર્ચનં કુર્યાત્તદેતદ્રક્ષોઘ્નં
મૃત્યુતારકં ગુરુણા લબ્ધં કણ્ઠે બાહૌ
શિખાયાં વા બધ્નીત સપ્તદ્વીપવતી ભૂમિર્દક્ષિણાર્થં
નાવકલ્પતે તસ્માચ્છ્રદ્ધયા યાં કાઞ્ચિદ્ગાં
દદ્યાત્સ દક્ષિણા ભવતિ ॥ ૨॥

દેવા હ વૈ પ્રજાપતિમબ્રુવન્નાનુષ્ટુભસ્ય
મન્ત્રરાજસ્ય નારસિંહસ્ય ફલં નો બ્રૂહિ
ભગવ ઇતિ સ હોવાચ પ્રજાપતિર્ય એતં મન્ત્રરાજં
નારસિંહમાનુષ્ટુભં નિત્યમધીતે સોઽગ્નિપૂતો
ભવતિ સ વાયુપૂતો ભવતિ સ આદિત્યપૂતો ભવતિ
સ સોમપૂતો ભવતિ સ સત્યપૂતો ભવતિ સ બ્રહ્મપૂતો
ભવતિ સ વિષ્ણુપૂતો ભવતિ સ રુદ્રપૂતો ભવતિ
સ સર્વપૂતો ભવતિ સ સર્વપૂતો ભવતિ ॥ ૩॥

ય એતં મન્ત્રરાજં નારસિંહમાનુષ્ટુભં
નિત્યમધીતે સ મૃત્યું તરતિ સ પાપ્માનં તરતિ
સ ભ્રૂણહત્યાં તરતિ સ વીરહત્યાં તરતિ સ સર્વહત્યાં
તરતિ સ સંસારં તરતિ સ સર્વં તરતિ સ સર્વં તરતિ ॥ ૪॥

ય એતં મન્ત્રરાજં નારસિંહમાનુષ્ટુભં
નિત્યમધીતે સોઽગ્નિં સ્તમ્ભયતિ સ વાયું સ્તમ્ભયતિ
સ આદિત્યં સ્તમ્ભયતિ સ સ્તોમં સ્તમ્ભયતિ સ ઉદકં
સ્તમ્ભયતિ સ સર્વાન્દેવાન્સ્તમ્ભયતિ સ
સર્વાન્ગ્રહાન્સ્તમ્ભયતિ સ વિષં સ્તમ્ભયતિ
સ વિષં સ્તમ્ભયતિ ॥ ૫॥

ય એતં મન્ત્રરાજં નારસિંહમાનુષ્ટુભં
નિત્યમધીતે સ દેવાનાકર્ષયતિ સ યક્ષાનાકર્ષયતિ
સ નાગાનાકર્ષયતિ સ ગ્રહાનાકર્ષયતિ સ
મનુષ્યાનાકર્ષયતિ સ સર્વાનાકર્ષયતિ સ

સર્વાનાકર્ષયતિ ॥ ૬॥

ય એતં મન્ત્રરાજં નારસિંહમાનુષ્ટુભં
નિત્યમધીતે સ ભૂર્લોકં જયતિ સ ભુવર્લોકં જયતિ
સ સ્વર્લોકં જયતિ સ મહર્લોકં જયતિ સ જનોલોકં
જયતિ સ તપોલોકં જયતિ સ સત્યલોકં જયતિ સ
સર્વાંલ્લોકાઞ્જયતિ સ સર્વાંલ્લોકાઞ્જયતિ ॥ ૭॥

ય એતં મન્ત્રરાજમાનુષ્ટુભં નિત્યમધીતે
સોઽગ્નિષ્ટોમેન યજતે સ ઉક્થ્યેન યજતે સ ષોડશિના
યજતે સ વાજપેયેન યજતે સોઽતિરાત્રેણ યજતે
સોઽપ્તોર્યામેણ યજતે સોઽશ્વમેધેન યજતે સ સર્વૈઃ
ક્રતુભિર્યજતે સ સર્વૈઃ ક્રતુભિર્યજતે ॥ ૮॥

ય એતં મન્ત્રરાજં નારસિંહમાનુષ્ટુભં
નિત્યમધીતે સ ઋચોઽધીતે સ યજૂંષ્યધીતે સ
સામાન્યધીતે સોઽથર્વણમધીતે સોઽઙ્ગિરસમધીતે
સ શાખા અધીતે સ પુરાણાન્યધીતે સ કલ્પાનધીતે
સ ગાથામધીતે સ નારાશંસીરધીતે સ પ્રણવમધીતે
યઃ પ્રણવમધીતે સ સર્વમધીતે સ સર્વમધીતે ॥ ૯॥

અનુપનીતશતમેકમેકેનોપનીતેન તત્સમમુપનીતશતમેકમેકેન
ગૃહસ્થેન તત્સમં ગૃહસ્થશતમેકમેકેન
વાનપ્રસ્થેન તત્સમં વાનપ્રસ્થશતમેકમેકેન
યતિના તત્સમં યતીનાં તુ શતં પૂર્ણમેકમેકેન
રુદ્રજાપકેન તત્સમં રુદ્રજાપકશતમેકમેકેન-
અથર્વશિરઃશિખાધ્યાપકેન તત્સમમથર્વશિરઃ-
શિખાધ્યાપકશતમેકમેકેન તાપનીયોપનિષદ-
ધ્યાપકેન તત્સમં તાપનીયોપનિષદધ્યાપક-
શતમેકમેકેન મન્ત્રરાજધ્યાપકેન તત્સમં તદ્વા
એતત્પરમં ધામ મન્ત્રરાજાધ્યાપકસ્ય યત્ર ન
સૂર્યસ્તપતિ યત્ર ન વાયુર્વાતિ યત્ર ન ચન્દ્રમા ભાતિ
યત્ર ન નક્ષત્રાણિ ભાન્તિ યત્ર નાગ્નિર્દહતિ યત્ર ન
મૃત્યુઃ પ્રવિશતિ યત્ર ન દુઃખં સદાનન્દં

પરમાનન્દં શાન્તં શાશ્વતં સદાશિવં
બ્રહ્માદિવન્દિતં યોગિધ્યેયં પરમં પદં યત્ર
ગત્વા ન નિવર્તન્તે યોગિનઃ ॥

તદેતદૃચાભ્યુક્તમ્ ।
તદ્વિષ્ણોઃ પરમં પદં સદા પશ્યન્તિ સૂરયઃ ।
દિવીવ ચક્ષુરાતતમ્ । તદ્વિપ્રાસો વિપન્યવો જાગૃવાંસઃ
સમિન્ધતે । વિષ્ણોર્યત્પરમં પદમ્ ।
તદેતન્નિષ્કામસ્ય ભવતિ તદેતન્નિષ્કામસ્ય ભવતિ
ય એવં વેદેતિ મહોપનિષત્ ॥ ૧૦॥

ઇતિ પઞ્ચમોપનિષત્ ॥ ૫॥

ઇતિ નૃસિંહપૂર્વતાપિન્યુપનિષત્ ॥

॥ નૃસિંહોત્તરતાપિન્યુપનિષત્ ॥

નૃસિંહોત્તરતાપિન્યાં તુર્યતુર્યાત્મકં મહઃ ।
પરમાદ્વૈતસામ્રાજ્યં પ્રત્યક્ષમુપલભ્યતે ॥

ॐ દેવા હ વૈ પ્રજાપતિમબ્રુવન્નણોરણીયાં-
સમિમમાત્માનમોઙ્કારં નો વ્યાચક્ષ્વેતિ
તથેત્યોમિત્યેતદક્ષરમિદં સર્વં તસ્યોપવ્યાખ્યાનં
ભૂતં ભવદ્ભવિષ્યદિતિ સર્વમોઙ્કાર એવ
યચ્ચાન્યત્ત્રિકાલાતીતં તદપ્યોઙ્કાર એવ સર્વં
હ્યેતદ્બ્રહ્માયમાત્મા બ્રહ્મ તમેતમાત્માનમોમિતિ
બ્રહ્મણૈકીકૃત્ય બ્રહ્મ ચાત્માનમોમિત્યેકીકૃત્ય
તદેકમજરમમૃતમભયમોમિત્યનુભૂય
તસ્મિન્નિદં સર્વં ત્રિશરીરમારોપ્ય તન્મયં હિ
તદેવેતિ સંહરેદોમિતિ તં વા એતં ત્રિશરીરમાત્માનં
ત્રિશરીરં પરં બ્રહ્માનુસન્દધ્યાત્સ્થૂલત્વાત્-
સ્થૂલભુક્ત્વાચ્ચ સૂક્ષ્મત્વાત્સૂક્ષ્મભુક્ત્વા-
ચ્ચૈક્યાદાનન્દભોગાચ્ચ સોઽયમાત્મા
ચતુષ્પાજ્જાગરિતસ્થાનઃ સ્થૂલપ્રજ્ઞઃ સપ્તાઙ્ગ
એકોનવિંશતિમુખઃ સ્થૂલભુક્ ચતુરાત્મા વિશ્વો
વૈશ્વાનરઃ પ્રથમઃ પાદઃ ॥

સ્વપ્નસ્થાનઃ સૂક્ષ્મપ્રજ્ઞઃ સપ્તાઙ્ગ
એકોનવિંશતિમુખઃ સૂક્ષ્મભુક્ ચતુરાત્મા
તૈજસો હિરણ્યગર્ભો દ્વિતીયઃ પાદઃ ॥

યત્ર સુપ્તો ન કઞ્ચન કામં કામયતે ન
કઞ્ચન સ્વપ્નં પશ્યતિ તત્સુષુપ્તં
સુષુપ્તસ્થાન એકીભૂતઃ પ્રજ્ઞાનઘન
એવાનન્દમયો હ્યાનન્દભુક્ ચેતોમુખશ્ચતુરાત્મા
પ્રાજ્ઞ ઈશ્વરસ્તૃતીયઃ પાદઃ ॥

એષ સર્વેશ્વર એષ સર્વજ્ઞ એષોઽન્તર્યામ્યેષ
યોનિઃ સર્વસ્ય પ્રભવાપ્યયૌ હિ ભૂતાનં
ત્રયમપ્યેતત્સુષુપ્તં સ્વપ્નં માયામાત્રં
ચિદેકરસો હ્યયમાત્માથ તુરીયશ્ચતુરાત્મા
તુરીયાવસિતત્વાદેકૈકસ્યોતાનુજ્ઞાત્રનુજ્ઞાવિકલ્પૈ-
સ્ત્રયમપ્યત્રાપિસુષુપ્તં સ્વપ્નં માયામાત્રં
ચિદેકરસો હ્યયમાત્માથાયમાદેશો ન
સ્થૂલપ્રજ્ઞં ન સૂક્ષ્મપ્રજ્ઞં નોભયતઃપ્રજ્ઞં
ન પ્રજ્ઞં નાપ્રજ્ઞં ન પ્રજ્ઞાનઘન-
મદૃષ્ટમવ્યવહાર્યમગ્રાહ્યમલક્ષણ-
મચિન્ત્યમચિન્ત્યમવ્યપદેશ્યમૈકાત્મ્યપ્રત્યયસારં
પ્રપઞ્ચોપશમં શિવં શાન્તમદ્વૈતં ચતુર્થં
મન્યન્તે સ આત્મા સ વિજ્ઞેય ઈશ્વરગ્રાસસ્તુરીયસ્તુરીયઃ ॥

ઇતિ પ્રથમઃ ખણ્ડઃ ॥ ૧॥

તં વા એતમાત્માનં જાગ્રત્યસ્વપ્નમસુષુપ્તં
સ્વપ્નેઽજાગ્રતમસુષુપ્તં સુષુપ્તેઽજાગ્રતમસ્વપ્નં
તુરીયેઽજાગ્રતમસ્વપ્નમસુષુપ્તમવ્યભિચારિણં
નિત્યાનન્દં સદેકરસં હ્યેવ ચક્ષુષો દ્રષ્ટા
શ્રોત્રસ્ય દ્રષ્ટા વાચો દ્રષ્ટા મનસો દ્રષ્ટા
બુદ્ધેર્દ્રષ્ટા પ્રાણસ્ય દ્રષ્ટા તમસો દ્રષ્ટા
સર્વસ્ય દ્રષ્ટા તતઃ સર્વસ્માદન્યો વિલક્ષણચક્ષુષઃ
સાક્ષી શ્રોત્રસ્ય સાક્ષી વાચઃ સાક્ષી મનસઃ સાક્ષીઃ

બુદ્ધેઃ સાક્ષી પ્રાણસ્ય સાક્ષી તમસઃ સાક્ષી
સર્વસ્ય સાક્ષી તતોઽવિક્રિયો મહાચૈતન્યોઽસ્માત્સર્વસ્માત્પ્રિયતમ
આનન્દઘનં હ્યેવમસ્માત્સર્વસ્માત્પુરતઃ
સુવિભાતમેકરસમેવાજરમમૃતમભયં
બ્રહ્મૈવાપ્યજયૈનં ચતુષ્પાદં માત્રાભિરોઙ્કારેણ
ચૈકીકુર્યાજ્જાગરિતસ્થાનશ્ચતુરાત્મા વિશ્વો
વૈશ્વાનરશ્ચતૂરૂપોઙ્કાર એવ ચતૂરૂપો var  ચતૂરૂપોઽકાર
હ્યયમકારઃ સ્થૂલસૂક્ષ્મબીજસાક્ષિભિરકારરૂપૈ-
રાપ્તેરાદિમત્ત્વાદ્વા સ્થૂલત્વાત્સૂક્ષ્મત્વાદ્-
બીજત્વાત્સાક્ષિત્વાચ્ચાપ્નોતિ હ વા ઇદં સર્વમાદિશ્ચ
ભવતિ ય એવં વેદ ॥

સ્વપ્નસ્થાનશ્ચતુરાત્મા તૈજસો હિરણ્યગર્ભશ્ચતૂરૂપ
ઉકાર એવ ચતૂરૂપો હ્યયમુકારઃ સ્થૂલસૂક્ષ્મબીજ-
સાક્ષિભિરુકારરૂપૈરુત્કર્ષાદુભયત્વાત્સ્થૂલત્વાત્-
સૂક્ષ્મત્વાદ્બીજત્વાત્સાક્ષિત્વાચ્ચોત્કર્ષતિ હ વૈ
જ્ઞાનસન્તતિં સમાનશ્ચ ભવતિ ય એવં વેદ ॥

સુષુપ્તસ્થાનશ્ચતુરાત્મા પ્રાજ્ઞઈશ્વરશ્ચતુરૂપો
મકાર એવ ચતૂરૂપો હ્યયં મકારઃ સ્થૂલસૂક્ષ્મ-
બીજસાક્ષિભિર્મકારરૂપૈર્મિતેરપીતેર્વા સ્થૂલત્વાત્-
સૂક્ષ્મત્વાદ્બીજત્વાત્સાક્ષિત્વાચ્ચ મિનોતિ હ વા
ઇદં સર્વમપીતિશ્ચ ભવતિ ય એવં વેદ ॥

માત્રામાત્રાઃ પ્રતિમાત્રાઃ કુર્યાદથ તુરીય ઈશ્વરગ્રાસઃ
સ સ્વરાટ્ સ્વયમીશ્વરઃ સ્વપ્રકાશશ્ચતુરાત્મો-
તાનુજ્ઞાત્રનુજ્ઞાવિકલ્પૈરોતો હ્યયમાત્મા હ્યથૈવેદં var  યથેદં
સર્વમન્તકાલે કાલાગ્નિઃ સૂર્ય ઉસ્રૈરનુજ્ઞાતો હ્યયમાત્મા
હ્યસ્ય સર્વસ્ય સ્વાત્માનં દદાતીદં સર્વં
સ્વાત્માનમેવ કરોતિ યથા તમઃ સવિતન્ ઞૈકરસો
હ્યયમાત્મા ચિદ્રૂપ એવ યથા દાહ્યં દગ્ધ્વાગ્નિરવિકલ્પો
હ્યયમાત્મા વાઙ્મનોઽગોચરત્વાચ્ચિદ્રૂપશ્ચતૂરૂપ
ૐકાર એવ ચતૂરૂપો હ્યયમોઙ્કાર ઓતાનુજ્ઞાત્રનુજ્ઞા-
વિકલ્પૈરોઙ્કારરૂપૈરાત્મૈવ નામરૂપાત્મકં હીદં

સર્વં તુરીયત્વાચ્ચિદ્રૂપત્વાચ્ચોતત્વાદનુજ્ઞાતૃત્વાદ-
નુજ્ઞાનત્વાદવિકલ્પરૂપત્વાચ્ચાવિકલ્પરૂપં હીદં
સર્વં નૈવ તત્ર કાચન ભિદાસ્ત્યથ var  મિદાસ્ત્યથ
તસ્યાયમાદેશોઽમાત્રશ્ચતુર્થોઽવ્યવહાર્યઃ પ્રપઞ્ચોપશમઃ
શિવોઽદ્વૈત ઓઙ્કાર આત્મૈવ સંવિશત્યાત્મનાત્માનં
ય એવં વેદૈષ વીરો નારસિંહેન વાનુષ્ટુભા
મન્ત્રરાજેન તુરીયં વિદ્યાદેષ હ્યાત્માનં પ્રકાશયતિ
સર્વસંહારસમર્થઃ પરિભવાસહઃ પ્રભુર્વ્યાપ્તઃ
સદોજ્જ્વલોઽવિદ્યાતત્કાર્યહીનઃ સ્વાત્મબન્ધહરઃ સર્વદા
દ્વૈતરહિત આનન્દરૂપઃ સર્વાધિષ્ઠાનઃ સન્માત્રો
નિરસ્તાવિદ્યાતમોમોહોઽહમેવેતિ તસ્માદેવમેવેમમાત્માનં
પરં બ્રહ્માનુસન્દધ્યાદેષ વીરો નૃસિંહ એવેતિ ॥

ઇતિ દ્વિતીયઃ ખણ્ડઃ ॥ ૨॥

તસ્ય હ વૈ પ્રણવસ્ય યા પૂર્વા માત્રા સા પ્રથમઃ
પાદો ભવતિ દ્વિતીયા દ્વિતીયસ્ય તૃતીયા તૃતીયસ્ય
ચતુર્થ્યોતાનુજ્ઞાત્રનુજ્ઞાવિકલ્પરૂપા તયા તુરીયં
ચતુરાત્માનમન્વિષ્ય ચતુર્થપાદેન ચ તયા
તુરીયેણાનુચિન્તયન્ગ્રસેત્તસ્ય હ વા એતસ્ય પ્રણવસ્ય
યા પૂર્વા માત્રા સા પૃથિવ્યકારઃ સ ઋગ્ભિરૃગ્વેદો
બ્રહ્મા વસવો ગાયત્રી ગાર્હપત્યઃ સા પ્રથમઃ પાદો
ભવતિ । ભવતિ ચ સર્વેષુ પાદેષુ ચતુરાત્મા સ્થૂલસૂક્ષ્મ-
બીજસાક્ષિભિર્દ્વિતીયાન્તરિક્ષં સ ઉકારઃ સ યજુર્ભિર્યજુર્વેદો
વિષ્ણુરુદ્રાસ્ત્રિષ્ટુબ્દક્ષિણાગ્નિઃ સા દ્વિતીયઃ
પાદો ભવતિ ચ સર્વેષુ પાદેષુ ચતુરાત્મા
સ્થૂલસૂક્ષ્મબીજસાક્ષિભિસ્તૃતીયા દ્યૌઃ સ મકારઃ
સ સામભિઃ સામવેદો રુદ્રાદિત્યા જગત્યાહવનીયઃ સા
તૃતીયઃ પાદો ભવતિ । ભવતિ ચ સર્વેષુ પાદેષુ
ચતુરાત્મા સ્થૂલસૂક્ષ્મબીજસાક્ષિભિર્યાઽવસાનેઽસ્ય
ચતુર્થ્યર્ધમાત્રા સા સોમલોક ૐકારઃ સાથર્વણૈ-
ર્મન્ત્રૈરથર્વવેદઃ સંવર્તકોઽગ્નિર્મરુતો વિરાડેકર્ષિર્ભાસ્વતી
સ્મૃતા સા ચતુર્થઃ પાદો ભવતિ । ભવતિ ચ સર્વેષુ પાદેષુ

ચતુરાત્મા સ્થૂલસૂક્ષ્મબીજસાક્ષિભિર્માત્રા માત્રાઃ
પ્રતિમાત્રાઃ કૃત્વોતાનુજ્ઞાત્રનુજ્ઞાવિકલ્પરૂપં
ચિન્તયન્ગ્રસેજ્જ્ઞોઽમૃતો હુતસંવિત્કઃ શુદ્ધઃ સંવિષ્ટો
નિર્વિઘ્ન ઇમમસુનિયમેઽનુભૂયેહેદં સર્વં દૃષ્ટ્વા સ
પ્રપઞ્ચહીનોઽથ સકલઃ સાધારોઽમૃતમયશ્ચતુરાત્માથ
મહાપીઠે સપરિવારં તમેતં ચતુઃસપ્તાત્માનં
ચતુરાત્માનં મૂલાગ્નાવગ્નિરૂપં પ્રણવં
સન્દધ્યાત્સપ્તાત્માનં ચતુરાત્માનમકારં રુદ્રં
ભ્રૂમધ્યે સપ્તાત્માનં ચતુરાત્માનં ચતુઃસપ્તાત્માનં
ચતુરાત્માનમોઙ્કારં સર્વેશ્વરં દ્વાદશાન્તે
સપ્તાત્માનં ચતુરાત્માનં ચતુઃસપ્તાત્માનમોઙ્કારં
તુરીયમાનન્દામૃતરૂપં ષોડશાન્તેઽથાનન્દામૃતેનૈ-
તાંશ્ચતુર્ધા સમ્પૂજ્ય તથા બ્રહ્માણમેવ વિષ્ણુમેવ
રુદ્રમેવ વિભક્તાંસ્ત્રીનેવાવિભક્તાંસ્ત્રીનેવ લિઙ્ગરૂપાનેવ
ચ સમ્પૂજ્યોપહારૈશ્ચતુર્ધાથ લિઙ્ગાત્સંહૃત્ય var  લિઙ્ગાન્
તેજસા શરીરત્રયં સંવ્યાપ્ય તદધિષ્ઠાનમાત્માનં
સંજ્વાલ્ય તત્તેજ આત્મચૈતન્યરૂપં બલમવષ્ટભ્ય
ગુણૈરૈક્યં સમ્પાદ્ય મહાસ્થૂલં મહાસૂક્ષ્મે
મહાસૂક્ષ્મં મહાકારણે ચ સંહૃત્ય માત્રાભિરોતા-
નુજ્ઞાત્રનુજ્ઞાવિકલ્પરૂપં ચિન્તયન્ગ્રસેત્ ॥

ઇતિ તૃતીયઃ ખણ્ડઃ ॥ ૩॥

તં વા એતમાત્માનં પરમં બ્રહ્મોઙ્કારં
તુરીયોઙ્કારાગ્રવિદ્યોતમનુષ્ટુભા નત્વા પ્રસાદ્યોમિતિ
સંહૃત્યાહમિત્યનુસન્દધ્યાદથૈતમેવાત્માનં
પરમં બ્રહ્મોઙ્કારં તુરીયોઙ્કારાગ્રવિદ્યોતમેકા-
દશાત્માનં નારસિંહં નત્વોમિતિ સંહરન્નાનુસન્દધ્યા-
દથૈતમેવમાત્માનં પરમં બ્રહ્મોઙ્કારં
તુરીયોઙ્કારાગ્રવિદ્યોતં પ્રણવેન સંચિન્ત્યાનુષ્ટુભા
નત્વા સચ્ચિદાનન્દપૂર્ણાત્મસુ નવાત્મકં
સચ્ચિદાનન્દપૂર્ણાત્માનં પરં બ્રહ્મ સમ્ભાવ્યાહ-
મિત્યાત્માનમાદાય મનસા બ્રહ્મણૈકીકુર્યાદ્યદનુષ્ટુભૈવ var  નમસા

વા એષ ઉપવસન્નેષ હિ સર્વત્ર સર્વદા સર્વાત્મા સન્
સર્વમત્તિ નૃસિંહોઽસૌ પરમેશ્વરોઽસૌ હિ સર્વત્ર સર્વદા
સર્વાત્મા સન્ત્સર્વમત્તિ નૃસિંહ એવૈકલ એષ તુરીય
એષ એવોગ્ર એષ એવ વીર એષ એવ મહાનેષ એવ વિષ્ણુરેષ
એવ જ્વલન્નેષ એવ સર્વતોમુખ એષ એવ નૃસિંહ એષ એવ
ભીષણ એષ એવ ભદ્ર એષ એવ મૃત્યુમૃત્યુરેષ એવ
નમામ્યેષ એવાહમેવં યોગારૂઢો બ્રહ્મણ્યેવાનુષ્ટુભં
સન્દધ્યાદોઙ્કાર ઇતિ ॥ તદેતૌ શ્લોકૌ ભવતઃ ॥

સંસ્તભ્ય સિંહં સ્વસુતાન્ગુણાર્થાન્-
    સંયોજ્ય શ‍ૃઙ્ગૈરૃષભસ્ય હત્વા ॥

વશ્યાં સ્ફુરન્તીમસતીં નિપીડ્ય
    સમ્ભક્ષ્ય સિંહેન સ એષ વીરઃ ॥

શ‍ૃઙ્ગપ્રોતાન્પાદાન્સ્પૃષ્ટ્વા હત્વા તાનગ્રસત્સ્વયમ્ ।
નત્વા ચ બહુધા દૃષ્ટ્વા નૃસિંહઃ સ્વયમુદ્બભાવિતિ ॥

ઇતિ ચતુર્થઃ ખણ્ડઃ ॥ ૪॥

અથૈષ ઉ એવ અકાર આપ્તતમાર્થ આત્મન્યેવ
નૃસિંહે દેવે બ્રહ્મણિ વર્તત એષ હ્યેવાપ્તતમ
એષ હિ સાક્ષ્યેષ ઈશ્વરસ્તત્સર્વગતો ન હીદં
સર્વમેષ હિ વ્યાપ્તતમૈદં સર્વં યદયમાત્મા
માયામાત્ર એષ એવોગ્ર એષ હિ વ્યાપ્તતમ એષ
એવ વીર એષ હિ વ્યાપ્તતમ એષ એવ મહાનેષ
હિ વ્યાપ્તતમ એષ એવ વિષ્ણુરેષ હિ વ્યાપ્તતમ
એષ એવ જ્વલન્નેષ હિ વ્યાપ્તતમ એષ એવ
સર્વતોમુખ એષ હિ વ્યાપ્તતમ એષ એવ નૃસિંહ
એષ હિ વ્યાપ્તતમ એષ એવ ભીષણ એષ હિ
વ્યાપ્તતમ એષ એવ ભદ્ર એષ હિ વ્યાપ્તતમ
એષ એવ મૃત્યુમૃત્યુરેષ હિ વ્યાપ્તતમ એષ
એવ નમામ્યેષ હિ વ્યાપ્તતમ એષ એવાહમેષ
હિ વ્યાપ્તતમ આત્મૈવ નૃસિંહો દેવો બ્રહ્મ ભવતિ
ય એવં વેદ સોઽકામો નિષ્કામ આપ્તકામ

આત્મકામેન તસ્ય પ્રાણા ઉત્ક્રામન્ત્યત્રૈવ
સમવલીયન્તે બ્રહ્મૈવ સન્બ્રહ્માપ્યેત્યથૈષ
એવોઙ્કાર ઉત્કૃષ્ટતમાર્થ આત્મન્યેવ નૃસિંહે
દેવે બ્રહ્મણિ વર્તતે તસ્માદેષ સત્યસ્વરૂપો ન
હ્યન્યદસ્ત્યપ્રમેયમનાત્મપ્રકાશમેષ હિ
સ્વપ્રકાશોઽસઙ્ગોઽન્યન્ન વીક્ષત આત્માતો
નાન્યથા પ્રાપ્તિરાત્મમાત્રં હ્યેતદુત્કૃષ્ટમેષ
એવોગ્ર એષ હ્યેવોત્કૃષ્ટ એષ એવ વિષ્ણુરેષ
હ્યેવોત્કૃષ્ટ એષ એવ જ્વલન્નેષ હ્યેવોત્કૃષ્ટ
એષ એવ સર્વતોમુખ એષ હ્યેવોત્કૃષ્ટ એષ એવ
નૃસિંહ એષ હ્યેવોત્કૃષ્ટ એષ એવ ભીષણ
એષ હ્યેવોત્કૃષ્ટ એષ એવ ભદ્ર એષ હ્યેવોત્કૃષ્ટ
એષ એવ મૃત્યુમૃત્યુરેષ હ્યેવોત્કૃષ્ટ એષ
એવ નમામ્યેષ હ્યેવોત્કૃષ્ટ એષ એવાહમેષ
હ્યેવોત્કૃષ્ટસ્તસ્માદાત્માનમેવૈનં જાનીયાદાત્મૈવ
નૃસિંહો દેવો બ્રહ્મ ભવતિ ય એવં વેદ સોઽકામો
નિષ્કામ આપ્તકામ આત્મકામો ન તસ્ય પ્રાણા
ઉત્ક્રામન્ત્યત્રૈવ સમવલીયન્તે બ્રહ્મૈવ
સન્બ્રહ્માપ્યેત્યથૈષ એવ મકારો મહાવિભૂત્યર્થ
આત્મન્યૈવ નૃસિંહે દેવે બ્રહ્મણિ વર્તતે
તસ્માદયમનલ્પોઽભિન્નરૂપઃ સ્વપ્રકાશો બ્રહ્મૈવાપ્તતમ
ઉત્કૃષ્ટતમ એતદેવ બ્રહ્માપિ સર્વજ્ઞં મહામાયં
મહાવિભૂત્યેતદેવોગ્રમેતદ્ધિ મહાવિભૂત્યેતદેવ
વીરમેતદ્ધિ મહાવિભૂત્યતદેવ મહદેતદ્ધિ
મહાવિભૂત્યેતદેવ વિષ્ણ્વેતદ્ધિ મહાવિભૂત્યેતદેવ
જ્વલદેતદ્ધિ મહાવિભૂત્યેતદેવ સર્વતોમુખમેતદ્ધિ
મહાવિભૂત્યેતદેવ નૃસિંહમેતદ્ધિ મહાવિભૂત્યેતદેવ
ભીષણમેતદ્ધિ મહાવિભૂત્યેતદેવ ભદ્રમેતદ્ધિ
મહાવિભૂત્યેતદેવ મૃત્યુમૃત્ય્વેતદ્ધિ મહાવિભૂત્યેતદેવ
નમામ્યેતદ્ધિ મહાવિભૂત્યેતદેવાહમેતદ્ધિ મહાવિભૂતિ
તસ્માદકારોકારાભ્યામિમમાત્માનમાપ્તતમમુત્કૃષ્ટતમં
ચિન્માત્રં સર્વદ્રષ્ટારં સર્વસાક્ષિણં સર્વગ્રાસં

સર્વપ્રેમાસ્પદં સચ્ચિદાનન્દમાત્રમેકરસં
પુરતોઽસ્માત્સર્વસ્માત્સુવિભાતમન્વિષ્યાપ્તતમમુત્કૃષ્ટતમં
મહામાયં મહાવિભૂતિ સચ્ચિદાનન્દમાત્રમેકરસં
પુરમેવ બ્રહ્મ મકારેણ જાનીયાદાત્મૈવ નૃસિંહો દેવઃ var  પરમેવ
પરમેવ બ્રહ્મ ભવતિ ય એવં વેદ સોઽકામો નિષ્કામ
આપ્તકામ આત્મકામો ન તસ્ય પ્રાણા ઉત્ક્રામન્ત્યત્રૈવ
સમવલીયન્તે બ્રહ્મૈવ સન્બ્રહ્માપ્યેતીતિ હ પ્રજાપતિરુવાચ
પ્રજાપતિરુવાચ ॥

ઇતિ પઞ્ચમઃ ખણ્ડઃ ॥ ૫॥

તે દેવા ઇમમાત્માનં જ્ઞાતુમૈચ્છંસ્તાન્હાસુરઃ
પાપ્મા પરિજગ્રાહ ત ઐક્ષન્તહન્તૈનમાસુરં
પાપ્માનં ગ્રસામ ઇત્યેતમેવોઙ્કારાગ્રવિદ્યોતં
તુરીયતુરીયમાત્માનમુગ્રમનુગ્રં વીરમવીરં
મહાન્તમમહાન્તં વિષ્ણુમવિષ્ણું
જ્વલન્તમજ્વલન્તં સર્વતોમુખમસર્વતોમુખં
નૃસિંહમનૃસિંહં ભીષણમભીષણં
ભદ્રમભદ્રં મૃત્યુમૃત્યુમમૃત્યુમૃત્યું
નમામ્યનમામ્યહમનહં નૃસિંહાનુષ્ટુભૈવ
બુબુધિરે તેભ્યો હાસાવાસુરઃ પાપ્મા
સચ્ચિદાનન્દઘનજ્યોતિરભવત્તસ્માદપક્વકષાય
ઇમમેવોઙ્કારાગ્રવિદ્યોતં તુરીયતુરીયમાત્માનં
નૃસિંહાનુષ્ટુભૈવ જાનીયાત્તસ્યાસુરઃ પાપ્મા
સચ્ચિદાનન્દઘનજ્યોતિર્ભવતિ તે દેવા જ્યોતિષ ઉત્તિતીર્ષવો
દ્વિતીયાદ્ભયમેવ પશ્યન્ત ઇમમેવોઙ્કારાગ્રવિદ્યોતં
તુરીયતુરીયમાત્માનમનુષ્ટુભાન્વિષ્ય પ્રણવેનૈવ
તસ્મિન્નવસ્થિતાસ્તેભ્યસ્તજ્જ્યોતિરસ્ય સર્વસ્ય પુરતઃ
સુવિભાતમવિભાતમદ્વૈતમચિન્ત્યમલિઙ્ગં
સ્વપ્રકાશમાનન્દઘનં શૂન્યમભવદેવંવિત્સ્વપ્રકાશં
પરમેવ બ્રહ્મ ભવતિ તે દેવાઃ પુત્રૈષણાયાશ્ચ
વિત્તૈષણાયાશ્ચ લોકૈષણાયાશ્ચ સસાધનેભ્યો
વ્યુત્થાય નિરાકારા નિષ્પરિગ્રહા અશિખા અયજ્ઞોપવીતા

અન્ધા બધિરા મુગ્ધાઃ ક્લીબા મૂકા ઉન્મત્ત ઇવ
પરિવર્તમાનાઃ શાન્તા દાન્તા ઉપરતાસ્તિતિક્ષવઃ
સમાહિતા આત્મરતય આત્મક્રીડા આત્મમિથુના
આત્માનન્દાઃ પ્રણવમેવ પરં બ્રહ્માત્મપ્રકાશં
શૂન્યં જાનન્તસ્તત્રૈવ પરિસમાપ્તાસ્તસ્માદ્દેવાનાં
વ્રતમાચરન્નોઙ્કારે પરે બ્રહ્મણિ પર્યવસિતો ભવેત્સ
આત્મન્યેવાત્માનં પરં બ્રહ્મ પશ્યતિ ॥

તદેષ શ્લોકઃ ॥

શ઼ૃઙ્ગેશ્વશ઼ૃઙ્ગં સંયોજ્ય સિંહં શ઼ૃઙ્ગેષુ યોજયેત્ ।
શ઼ૃઙ્ગાભ્યાં શ઼ૃઙ્ગમાબધ્ય ત્રયો દેવા ઉપાસત ઇતિ ॥

ઇતિ ષષ્ઠઃ ખણ્ડઃ ॥ ૬॥

દેવા હ વૈ પ્રજાપતિમબ્રુવન્ ભૂય એવ નો
ભગવાન્વિજ્ઞાપયત્વિતિ તથેત્યજત્વાદમરત્વાદ-
જરત્વાદમૃતત્વાદશોકત્વાદમોહત્વાદનશનાયત્વાદ-
પિપાસત્વાદદ્વૈતત્વાચ્ચાકરેણેમમાત્માન-
મન્વિષ્યોત્કૃષ્ટત્વાદુત્પાદકત્વાદુત્પ્રવેષ્ટત્વાદુ-
ત્થાપયિતૃત્વાદુદ્દ્રષ્ટૃત્વાદુત્કર્તૃત્વાદુત્પથ-
વારકત્વાદુદ્ગ્રાસત્વાદુદ્ભ્રાન્તત્વાદુત્તીર્ણવિકૃતત્વા-
ચ્ચોઙ્કારેણેમમાત્માનં પરમં બ્રહ્મ
નૃસિંહમન્વિષ્યાકારેણેમમાત્માનમુકારં
પૂર્વાર્ધમાકૃષ્ય સિંહીકૃત્યોત્તરાર્ધેન તં
સિંહમાકૃષ્ય મહત્ત્વાન્મહસ્ત્વાન્માનત્વા-
ન્મુક્તત્વાન્મહાદેવત્વાન્મહેશ્વરત્વાન્મહાસત્ત્વા-
ન્મહાચિત્ત્વાન્મહાનન્દત્વાન્મહાપ્રભુત્વાચ્ચ
મકારાર્ધેનાનેનાત્મનૈકીકુર્યાદશરીરો
નિરિન્દ્રિયોઽપ્રાણોઽતમાઃ સચ્ચિદાનન્દમાત્રઃ
સ સ્વરાડ્ ભવતિ ય એવં વેદ કસ્ત્વમિત્યહમિતિ
હોવાચૈવમેવેદં સર્વં તસ્માદહમિતિ સર્વાભિધાનં
તસ્યાદિરયમકારઃ સ એવ ભવતિ । સર્વં હ્યયમાત્માયં
હિ સર્વાન્તરો ન હીદં સર્વમહમિતિ હોવાચૈવ

નિરાત્મકમાત્મૈવેદં સર્વં તસ્માત્સર્વાત્મકેનાકારેણ
સર્વાત્મકમાત્માનમન્વિચ્છેદ્બ્રહ્મૈવેદં સર્વં
સચ્ચિદાનન્દરૂપં સચ્ચિદાનન્દરૂપમિદં સર્વં
સદ્ધીદં સર્વં સત્સદિતિ ચિદ્ધીદં સર્વં કાશતે
પ્રકાશતે ચેતિ કિં સદિતીદમિદં નેત્યનુભૂતિરિતિ
કૈષેતીયમિયં નેત્યવચનેનૈવાનુભવન્નુવાચૈવમેવ
ચિદાનન્દાવપ્યવચનેનૈવાનુભવન્નુવાચ સર્વમન્યદિતિ
સ પરમાનન્દસ્ય બ્રહ્મણો નામ બ્રહ્મેતિ તસ્યાન્ત્યોऽયં
મકારઃ સ એવ ભવતિ તસ્માન્મકારેણ પરમં
બ્રહ્માન્વિચ્છેત્કિમિદમેવમિત્યુકાર ઇત્યેવાહાવિચિકિત્સન્-
તસ્માદકારેણેમમાત્માનમન્વિષ્ય મકારેણ બ્રહ્મણાનુ-
સન્દધ્યાદુકારેણાવિચિકિત્સન્નશરીરોऽનિન્દ્રિયોऽપ્રાણોऽતમાઃ
સચ્ચિદાનન્દમાત્રઃ સ સ્વરાડ્ ભવતિ ય એવં વેદ
બ્રહ્મ વા ઇદં સર્વમત્તૃત્વાદુગ્રત્વાદ્વીરત્વાન્મહત્વાદ્-
વિષ્ણુત્વાજ્જ્વલત્વાત્સર્વતોમુખત્વાન્નૃસિંહત્વાદ્ભીષણત્વા-
દ્ભદ્રત્વાન્મૃત્યુમૃત્યુત્વાન્નમામિત્વાદહંત્વાદિતિ સતતં
હ્યેતદ્બ્રહ્મોગ્રત્વાદ્વીરત્વાન્મહત્ત્વાદ્વિષ્ણુત્વાજ્જ્વલત્વા-
સર્વતોમુખત્વાન્નૃસિંહત્વાદ્ભીષણત્વાદ્ભદ્રત્વા-
ન્મૃત્યુમૃત્યુત્વાન્નમામિત્વાદિતિ તસ્માદકારેણ પરમં
બ્રહ્માન્વિષ્ય મકારેણ મન આદ્યવિતારં મન આદિસાક્ષિણ-
મન્વિચ્છેત્સ યદૈતત્સર્વમપેક્ષતે તદૈતત્સર્વમસ્મિન્પ્રવિશતિ
સ યદા પ્રતિબુધ્યતે તદેતત્સર્વમસ્માદેવોત્તિષ્ઠતિ તદેવ
તત્સર્વં નિરુહ્ય પ્રત્યૂહ્ય સમ્પીડ્ય સંજ્વાલ્ય સમ્ભક્ષ્ય
સ્વાત્માનમેવૈષાં દદાત્યત્યુગ્રોऽતિવીરોતિમહાનિતિ
વિષ્ણુરતિજ્વલન્નતિસર્વતોમુખોऽતિનૃસિંહોऽતિભીષણોऽતિ-
ભદ્રોતિમૃત્યુમૃત્યુરતિનમામ્યત્યહં ભૂત્વા સ્વે મહિમ્નિ
સદા સમાસતે તસ્માદેનમકારાર્થેન પરેણ
બ્રહ્મણૈકીકુર્યાદુકારેણાવિચિકિત્સન્નશરીરો
નિરિન્દ્રિયોऽપ્રાણોऽમનઃ સચ્ચિદાનન્દમાત્રઃ સ સ્વરાડ્ ભવતિ
ય એવં વેદ ॥

તદેષ શ્લોકઃ ॥

શ◌ૃઙ્ગં શ◌ૃઙ્ગાર્ધમાકૃષ્ય શ◌ૃઙ્ગેણાનેન યોજયેત્ ।
શ◌ૃઙ્ગમેનં પરે શ◌ૃઙ્ગે તમનેનાપિ યોજયેત્ ॥

ઇતિ સપ્તમઃ ખણ્ડઃ ॥ ૭॥

અથ તુરીયેણોતશ્ચ પ્રોતશ્ચ હ્યયમાત્મા
નૃસિંહોઽસ્મિન્સર્વમયં સર્વાત્માનં હિ
સર્વં નૈવાતોઽદ્વયો હ્યયમાત્મૈકલ એવાવિકલ્પો
ન હિ વસ્તુ સદયં હ્યોત ઇવ સદ્ઘનોઽયં ચિદ્ઘન
આનન્દઘન એવૈકરસોઽવ્યવહાર્યઃ કેનચનાદ્વિતીય
ઓતશ્ચ પ્રોતશ્ચૈષ ઓઙ્કાર એવં નૈવમિતિ પૃષ્ટ
ઓમિત્યેવાહ વાગ્વા ઓઙ્કારો વાગેવેદં સર્વં ન
હ્યશબ્દમિવેહાસ્તિ ચિન્મયો હ્યયમોઙ્કારશ્ચિન્મયમિદં
સર્વં તસ્માત્પરમેશ્વર એવૈકમેવ તદ્ભવત્યેત-
દમૃતમયમેતદ્બ્રહ્માભયં વૈ બ્રહ્મ ભવતિ
ય એવં વેદેતિ રહસ્યમનુજ્ઞાતા હ્યયમાત્મૈષ
હ્યસ્ય સર્વસ્ય સ્વાત્માનમનુજાનાતિ ન હીદં સર્વં
સ્વત આત્મવિન્ન હ્યયમોતો નાનુજ્ઞાતાઽસઙ્ગત્વાદ-
વિકારિત્વાદસત્ત્વાદન્યસ્યાનુજ્ઞાતા હ્યયમોઙ્કાર
ઓમિતિ હ્યનુજાનાતિ વાગ્વા ઓઙ્કારો વાગેવેદં
સર્વમનુજાનાતિ ચિન્મયો હ્યયમોઙ્કારશ્ચિદ્ધીદં
સર્વં નિરાત્મકમાત્મસાત્કરોતિ તસ્માત્પરમેશ્વર
એવૈકમેવ તદ્ભવત્યેતદમૃતમભયમેતદ્બ્રહ્માભયં
વૈ બ્રહ્માભયં હિ વૈ બ્રહ્મ ભવતિ ય એવં વેદેતિ
રહસ્યમનુજ્ઞૈકરસો હ્યયમાત્મા પ્રજ્ઞાનઘન
એવાયં યસ્માત્સર્વાત્પુરતઃ સુવિભાતોઽતશ્ચિદ્ઘન
એવ ન હ્યયમોતો નાનુજ્ઞાતૈતદાત્મ્યં હીદં સર્વં
સદેવાનુજ્ઞૈકરસો હ્યયમોઙ્કાર ઓમિતિ હ્યેવાનુજાનાતિ
વાગ્વા ઓઙ્કારો વાગેવ હ્યનુજાનાતિ ચિન્મયો
હ્યયમોઙ્કારશ્ચિદેવ હ્યનુજ્ઞા તસ્માત્પરમેશ્વર
એવૈકમેવ તદ્ભવત્યેતદમૃતમભયમેતદ્બ્રહ્માભયં
વૈ બ્રહ્માભયં હિ વૈ બ્રહ્મ ભવતિ ય એવં વેદેતિ
રહસ્યમવિકલ્પો હ્યયમાત્માઽદ્વિતીયત્વાદવિકલ્પો

હ્યયમોઙ્કારોઽદ્વિતીયત્વાદેવ ચિન્મયો હ્યયમોઙ્કાર-
સ્તસ્માત્પરમેશ્વર એવૈકમેવ તદ્ભવત્યવિકલ્પોઽપિ
નાત્ર કાચન ભિદાસ્તિ નૈવ તત્ર કાચન ભિદાસ્ત્યત્ર
હિ ભિદામિવ મન્યમાનઃ શતધા સહસ્રધા ભિન્નો
મૃત્યોઃ સ મૃત્યુમાપ્નોતિ તદેતદદ્વયં સ્વપ્રકાશં
મહાનન્દમાત્મા એવૈતદમૃતમભયમેતદ્બ્રહ્માભયં
વૈ બ્રહ્માભયં હિ વૈ બ્રહ્મ ભવતિ ય એવં વેદેતિ
રહસ્યમ્ ॥

ઇત્યષ્ટમઃ ખણ્ડઃ ॥ ૮॥

દેવા હ વૈ પ્રજાપતિમબ્રુવન્નિમમેવ નો
ભગવન્નોઙ્કારમાત્માનમુપદિશેતિ
તથેત્યુપદ્રષ્ટાનુમન્તૈષ આત્મા
નૃસિંહશ્ચિદ્રૂપ એવાવિકારો હ્યુપલબ્ધઃ
સર્વસ્ય સર્વત્ર ન હ્યસ્તિ દ્વૈતસિદ્ધિરાત્મૈવ
સિદ્ધોઽદ્વિતીયો માયયા હ્યન્યદિવ સ વા એષ
આત્મા પર એષૈવ સર્વં તથાહિ પ્રાજ્ઞે સૈષાઽવિદ્યા
જગત્સર્વમાત્મા પરમાત્મૈવ
સ્વપ્રકાશોઽપ્યવિષયજ્ઞાનત્વાજ્જાનન્નેવ
હ્યન્યત્રાન્યન્ન વિજાનાત્યનુભૂતેર્માયા ચ var  હ્યત્ર ન
તમોરૂપાનુભૂતિસ્તદેતજ્જડં મોહાત્મકમ-
નન્તમિદં રૂપસ્યાસ્ય વ્યઞ્જિકા નિત્યનિવૃત્તાપિ
મૂઢૈરાત્મેવ દૃષ્ટાસ્ય સત્ત્વમસત્ત્વં ચ
દર્શયતિ સિદ્ધત્વાસિદ્ધત્વાભ્યાં સ્વતન્ત્રા-
સ્વતન્ત્રત્વેન સૈષા વટબીજસામાન્યવદનેક-
વટશક્તિરેકૈવ । તદ્યથા વટબીજસામન્યમેક-
મનેકાન્સ્વાવ્યતિરિક્તાન્વટાન્સબીજાનુત્પાદ્ય તત્ર
તત્ર પૂર્ણં સત્તિષ્ઠત્યેવમેવૈષા માયા
સ્વાવ્યતિરિક્તાનિ પૂર્ણાનિ ક્ષેત્રાણિ દર્શયિત્વા
જીવેશાવભાસેન કરોતિ માયા ચાવિદ્યા ચ
સ્વયમેવ ભવતિ સૈષા ચિત્રા સુદૃઢા
બહ્વઙ્કુરા સ્વયં ગુણભિન્નાઙ્કુરેષ્વપિ

ગુણભિન્ના સર્વત્ર બ્રહ્મવિષ્ણુશિવરૂપિણી
ચૈતન્યદીપ્તા તસ્માદાત્મન એવ ત્રૈવિધ્યં
સર્વત્ર યોનિત્વમભિમન્તા જીવો નિયન્તેશ્વરઃ
સર્વાહમ્માની હિરણ્યગર્ભસ્ત્રિરૂપ ઈશ્વર-
વદ્વ્યક્તચૈતન્યઃસર્વગો હ્યેષ ઈશ્વરઃ
ક્રિયાજ્ઞાનાત્મા સર્વં સર્વમયં સર્વે જીવાઃ
સર્વમયાઃ સર્વાસ્વવસ્થાસુ તથાપ્યલ્પાઃ
સ વા એષ ભૂતાનીન્દ્રિયાણિ વિરાજં દેવતાઃ
કોશાંશ્ચ સૃષ્ટ્વા પ્રવિશ્યામૂઢો
મૂઢ ઇવ વ્યવહરન્નાસ્તે માયયૈવ તસ્માદદ્વય
એવાયમાત્મા સન્માત્રો નિત્યઃ શુદ્ધો બુદ્ધઃ
સત્યો મુક્તો નિરઞ્જનો વિભુરદ્વયાનન્દઃ પરઃ
પ્રત્યગેકરસઃ પ્રમાણૈરેતૈરવગતઃ સત્તામાત્રં
હીદં સર્વં સદેવ પુરસ્તાત્સિદ્ધં હિ બ્રહ્મ ન
હ્યત્ર કિઞ્ચાનુભૂયતે નાવિદ્યાનુભવાત્મા
ન સ્વપ્રકાશે સર્વસાક્ષિણ્યવિક્રિયેઽદ્વયે
પશ્યતેહાપિ સન્માત્રમસદન્યત્સત્યં હીત્થં
પુરસ્તાદયોનિ સ્વાત્મસ્થમાનન્દચિદ્ઘનં
સિદ્ધં હ્યસિદ્ધં તદ્વિષ્ણુરીશાનો બ્રહ્માન્યદપિ
સર્વં સર્વગતં સર્વમત એવ શુદ્ધોઽબાધ્યસ્વરૂપો
બુદ્ધઃ સુખસ્વરૂપ આત્મા ન હ્યેતન્નિરાત્મકમપિ
નાત્મા પુરતો હિ સિદ્ધો ન હીદં સર્વં કદાચિદાત્મા
હિ સ્વમહિમસ્થો નિરપેક્ષ એક એવ સાક્ષી સ્વપ્રકાશઃ
કિં તન્નિત્યમાત્માત્ર હ્યેવ ન વિચિકિત્સ્યમેતદ્ધીદં
સર્વં સાધયતિ દ્રષ્ટા દ્રષ્ટુઃ સાક્ષ્યવિક્રિયઃ
સિદ્ધો નિરવદ્યો બાહ્યાભ્યન્તરવીક્ષણાત્સુવિસ્ફુટતમઃ
સ પરસ્તાદ્બ્રૂતૈષ દૃષ્ટોઽદૃષ્ટોઽવ્યવહાર્યોઽપ્યલ્પો
નાલ્પઃ સાક્ષ્યવિશેષોઽનન્યોઽસુખદુઃખોઽદ્વયઃ
પરમાત્મા સર્વજ્ઞોઽનન્તોઽભિન્નોઽદ્વયઃ સર્વદા
સંવિત્તિર્માયયા નાસંવિત્તિઃ સ્વપ્રકાશે યૂયમેવ
દૃષ્ટાઃ કિમદ્વયેન દ્વિતીયમેવ ન યૂયમેવ
બ્રૂહ્યેવ ભગવન્નિતિ દેવા ઊચુર્યૂયમેવ દૃશ્યતે

ચેન્નાત્મજ્ઞા અસઙ્ગો હ્યયમાત્માઽતો યૂયમેવ
સ્વપ્રકાશા ઇદં હિ સત્સંવિન્મયત્વાદ્યૂયમેવ
નેતિ હોચુર્હન્તાસઙ્ગા વયમિતિ હોચુઃ કથં
પશ્યન્તીતિ હોવાચ ન વયં વિદ્મ ઇતિ હોચુસ્તતો
યૂયમેવ સ્વપ્રકાશા ઇતિ હોવાચ ન ચ
સત્સંવિન્માયા એતૌ હિ પુરસ્તાત્સુવિભાતમવ્યવહાર્ય-
મેવાદ્વયં જ્ઞાતો નૈષ વિજ્ઞાતો વિદિતાવિદિતાત્પર
var for naiSha  હ્યેવૈષ
ઇતિ હોચુઃ સ હોવાચ તદ્વા એતદ્બ્રહ્માદ્વયં
બ્રહ્મત્વાન્નિત્યં શુદ્ધં બુદ્ધં મુક્તં સત્યં
સૂક્ષ્મં પરિપૂર્ણમદ્વયં સદાનન્દચિન્માત્ર-
માત્મૈવાવ્યવહાર્યં કેન ચ તત્તદેતદાત્માન-
મોમિત્યપશ્યન્તઃ પશ્યત તદેતત્સત્યમાત્મા
બ્રહ્મૈવ બ્રહ્માત્મૈવાત્ર હ્યેવ ન વિચિકિત્સ્યમિત્યોં
સત્યં તદેતત્પણ્ડિતા એવ પશ્યન્ત્યેતદ્ધ્યશબ્દ-
મસ્પર્શમરૂપમરસમગન્ધમવક્તવ્યમના-
દાતવ્યમગન્તવ્યમવિસર્જયિતવ્યમનાનન્દયિતવ્ય-
મમન્તવ્યમબોદ્ધવ્યમમનહઙ્કર્તયિતવ્યમ-
ચેતયિતવ્યમપ્રાણયિતવ્યમનપાનયિતવ્યમ-
વ્યાનયિતવ્યમનુદાનયિતવ્યમસમાનયિતવ્યમ-
નિન્દ્રિયમવિષયમકરણમલક્ષણમસઙ્ગમ-
ગુણમવિક્રિયમવ્યપદેશ્યમસત્ત્વમરસ્કમ-
તમસ્કમમાયમભયમપ્યૌપનિષદમેવ
સુવિભાતં સકૃદ્વિભાતં પુરતોઽસ્માત્સર્વસ્મા-
ત્સુવિભાતમદ્વયં પશ્યત હંસઃ સોઽહમિતિ સ var  પશ્યતાહં સ
હોવાચ કિમેષ દૃષ્ટોઽદૃષ્ટો વેતિ દૃષ્ટો
વિદિતાવિદિતાત્પર ઇતિ હોચુઃ ક્વૈષા કથમિતિ હોચુઃ
કિં તેન ન કિંચનેતિ હોચુર્યૂયમેવાશ્ચર્યરૂપા
ઇતિ હોવાચ ન ચેત્યાહુરોમિત્યનુજાનીધ્વં બ્રૂતૈનમિતિ
જ્ઞાતોઽજ્ઞાતશ્ચેતિ હોચુર્નચૈનમિતિ હોચુરિતિ
બ્રૂતૈવૈનમાત્મસિદ્ધમિતિ હોવાચ પશ્યામ
એવ ભગવો ન ચ વયં પશ્યામો નૈવ વયં વક્તું

શક્નુમો નમસ્તેઽસ્તુ ભગવન્ પ્રસીદેતિ હોચુર્ન
ભેતવ્યં પૃચ્છતેતિ હોવાચ ક્વૈષનુજ્ઞૈત્યેષ var  કૈષાનુજ્ઞૈત્યેષ
એવાત્મેતિ હોવાચ તે હોચુર્નમસ્તુભ્યં વયં ત ઇતિ હ
પ્રજાપતિર્દેવાનનુ શશાસાનુશશાસેતિ ॥

તદેષ શ્લોકઃ ॥

ઓતમોતેન જાનીયાદનુજ્ઞાતારમાન્તરમ્ ।
અનુજ્ઞામદ્વયં લબ્ધ્વા ઉપદ્રષ્ટારમાવ્રજેત્ ॥

ઇતિ નવમઃ ખણ્ડઃ ॥ ૯॥

ૐ ભદ્રં કર્ણેભિઃ શ‍ૃણુયામ દેવાઃ ।
ભદ્રં પશ્યેમાક્ષભિર્યજત્રાઃ ।
સ્થિરૈરઙ્ગૈસ્તુષ્ટુવાꣳ સસ્તનૂભિઃ ।
વ્યશેમ દેવહિતં યદાયુઃ ।
ૐ સ્વસ્તિ ન ઇન્દ્રો વૃદ્ધશ્રવાઃ ।
સ્વસ્તિ નઃ પૂષા વિશ્વવેદાઃ ।
સ્વસ્તિ નસ્તાર્ક્ષ્યો અરિષ્ટનેમિઃ ।
સ્વસ્તિ નો બૃહસ્પતિર્દધાતુ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

ઇતિ નૃસિંહોત્તરતાપિન્યુપનિષત્સમાપ્તા ॥

Mostly from IShAdyaShTottarashanopaniShadH by Shri Vasudev Lakshman Panashikar
Also IshAdiviMshottarashatomaniShadH by Shri Narayana Ram AchArya

Encoded and proofread by Sunder Hattangadi
Reproofread by Vipin Kumar

---

*Nrisinhatapini Upanishad*
pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*